# निदेशकनिवेदनम्

भारतीय उच्च अध्ययन संस्थान (Indian Institute of Advanced Study) भारतीय ज्ञानपरंपरायाः समभिवर्धने सुश्लाध्यं कार्यक्रमं निर्वहति। तत्तद्विषयेषु परिणतमतीनां विदुषां विचारधाराः प्रबन्धरूपेण प्रकाशयितुं समुध्यमोऽपि संस्थायाः कार्यक्रमेष्वन्यतमः । भारतीयदर्शनेषु सुरभारती भूषितस्य ग्रन्थरत्नस्य प्रकाशनम् इदम्प्रथमतया संस्थयाऽनया समङ्गीक्रतं वर्तते। तत्फलरूपेणैव ग्रन्थरत्नमिदं महाजनानां सम्मुखे सन्दीप्यते। समग्रे भारतदेशे विराजमानाः विद्वांसः विषयेऽत्र विचारधारा वितरणं कृतवन्तः इति महदिदं प्रमोदस्थानम्। अयं च प्रयत्नः भारतीयविदुषां विचार-परंपरायाः समानरूपतायाः भारतीय भावनैकतायाश्च प्रध्योतको भवतीति प्रमोदभरातिशयः । सर्वेऽपीमे विद्वांसः कृतज्ञताव्याहारभरैः सप्रमोदं सम्भाव्यन्ते । बेङ्गलूरुनगरीयः प्राध्यापकः डा. एस्. रङ्गनाथ महोदयः महत्या श्रद्धया ग्रन्थसम्पादनकार्य सम्यक् निरूढ़वानिति सर्वाकारेण समभिनंध्यते।

विनोद चन्द्र श्रीवास्तवः
निदेशकः
भारतीय उच्च अध्ययन संस्थान शिमला